CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उदाहरणानि

श्रीभाष्यम् विजयसारथिः

अध्यापकः
श्रीविश्वेश्वरसंस्कृतान्धकरुशाला, चरंगलः

468

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भारतीय विद्या भवन (संस्कृत विभाग)
कर्जन रोड, नई दिल्ली

परीक्षार्थी का नाम-

परीक्षा का नाम-

पारितोषिक-द्वारा-

वर्ष १९६६, दि०

Ramanarayanan
सचालक

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

468

उदाहरणानि



श्रीभाष्यम् विजयसारथिः

अध्यापकः
श्रीविश्वेश्वरसंस्कृतान्ध्रकलाशाला, वरंगल.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कृतिरियं वादिककलशीलाप्रधानाचार्यः कविशाब्दिकपत्तरि

न. च. श्रीरघुनाथाचार्यपादैः

परिष्कृता

विजयमुद्राक्षरशालाधिपतिभिः

श्रीपल्लारामकोटार्यमहोदयैश्च

स्वीयमुद्राक्षरशालायां मुद्रापिता

५०० प्रतयः

क्रोधि विजयदशमी

शा-श १८८६

मूल्यम् रूप्य मेकम्



प्राप्तिस्थानम् :—

श्रीभाष्यम् विजयसारथिः

विश्वेश्वरसंस्कृतान्ध्रकलाशाला,

स्टेशन रोड – वरंगल,

(आन्ध्र प्रदेश)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

BHUMIKA.

Dr. K. Suprasannacharya,
M. A., Ph. D.,
Lecturer, Arts and Science College, Warangal (A. P.)

In every Literature, devotional poetry forms the major part. *Vedas* are the lyrics in priase of *Indra, Varuna, Agni* and other *Vedic* deities. In emtional ecstacy the dovtee feels the presense of God before himself. The *Bhakti* cult, which is the most important path in Indian philosophy, has been influencing our life throughout many centuries. Its main scripture *BHAGAVATA* had demonstrated the various facets of devotion and described the lives of *Bhagavatas.* This philosophy was systematised by the aphorisms of *Narada* and *Sandilya.* Even *Sri Ramanuja* said that "श्रीनिवासे, वसतु मम परस्मिन् शेमुषी भक्तिरूपा"

Mukundamala, Soundaryalahari, and *Kirshnakarnamrita* are the main important works of devotional poetry in Sanskrit. Every devotee tried to express his devotion in the form of speech and this branch took many shapes as *Satakas, Ashtakas, Dasakas, Sahasrakas, Namavalis, Suprabhatams* and many other forms. Every form has the peculiarities and delicate expressions *Jayadeva's Gitagovinda* is almost a musical play where *Ashtapadis* (Musical compositions which have eight *Padas* each) were employed. This was certainly a *Desi* [illegible]

Digitized by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Udaharana is also a peculiar form in Sanskrit devotional poetry which is little known for non-andhra readers. It is a composition which sprung in Telugu land in 12th Century. *Palkuriki Somanatha*, a *Virasaiva* poet and Scholar who wrote *Basavapurana* and *Panditaradhya-Charitra* was the originator of this form. He wrote two *Udaharanas* both in Sanskrit and Telugu on *Basava*. After *Somanatha* some *Alamkarikas* mentioned this form in their works. *Amritanandanatha*, gave a detailed description of *Udaharana Kavya* in his *Alamkara-Sangraha*. Then *Vidyanatha* of *Kakatiya* Court followed him. *Krishna Yajwa* of *Gobburi Narasaraja's* Court (16th Century) also described it and gave a *Lakshya* in his work. As all these *Alamkarikas* belong to *Andhra desa* we may conclude that this form does not spread else where.

In *Udaharana*, *Desi* and *Marga* metres are attractively mingled together. I think that it was originally a *Desi* form which was sung for the praise of Kings in the Royal Courts. *Somanatha* introduced this form from those songsters and gave it a Classical touch.

Udaharana consists of nine parts, in which first eight will have one *Vritta*, one *Kalika* and one *Utkalika* or *Arthakalika*, and each part is devoted for one *Vibhakti*, where *Sambodhana* will be the last. The last one forms the *Sarvavibhaktika* verse and *Kartrinamankita* Verse. *Prathama* should start with the word '*Jaya*' preferably in *Malini* metre.

Kalika has eight *Padas* with *antyanuprasas* and *Adiprasas* for each two *Padas*. Every *Kalika* may

Funding by TKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

form with the *Ganas* of 3, 4, 5. 7, 9 *Matras*, each *Pada* will have four or eight *ganas* with two parts. *Utkalika* is the half *Kalika* with *antya*, and *adiprasas*, where the last two *Padas* only end with the *Vibhakti*. The *Utkalika* of fourth *Vibhakti* will have *Vibhakti-Abhasa*. *Krishna Yajwa* tells that some writers used *Arya* in the place of *Utkalika*. But there is no *Udaharana* available with that *lakshya*. The *Kartrinamankita* verse should be *Anushtubh* or *Arya*.

After *Somanatha* there were only one or two attempts to write *Udahranas* in Sanskrit. We don't know why it was not popular. Some Telugu poets followed *Somanatha* and now there are more than thirty *Udahranas* in Telugu. It is attracting many modern poets also.

My friend *Sri Sribhashyam Vijayasarathi*, a gifted poet in Sanskrit is presenting this collection of three *Udaharanas* to the Sanskrit world, which, I think, will be received warmly. He has been writing Sanskrit poems from his early age and his poetical skill is appreciated well. He comes from a family of Scholars.

Among his earlier works, *Atmadanam*, *Sabarivilapa*, *Vishaada Lahari* and *Gitanjali* may be mentioned. Though he writes traditional metrical forms, he often likes to use the *Desi* metres in Sanskrit which, in his opinion, will become popular by the medium of music.

In these *Udaharanas* poet used *Yati* and *Prasa* in *Vrittas* also. He did not use *Malini* in first two *Udaharanas*. He employed *Utpalamala*, *Champakamala*,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Mattebha-Vikridita and *Sardula-Vikridita* the *Vrittas* which are not except the last, popular in Sanskrit.

The poet's power of imagination and his skill in versification are remarkable in this work where the poet is bound with many *Niyamas*. The delicate expression of the poet can be seen in the following verse.

जयता च्चारुशिरीषपेशलवपु स्संसारवाराशि.... (Page 12)

As a student of philosophy the poet is bent towards *Visishtadvaita*. His faith in that thought is expressed in another verse.

सदसद्भादविवादमोदमदिरास्वादावलिप्तात्म (Page 28)

We wish that may Lord *Srinivasa* bless him with energy to march in the path of the Sanskrit renaisance.

We must be thankful to all those who helped the writer to publish his works and specially to *Sri Palla Rama Kotarya* of Vijaya Press, who is helping and encouraging him in the task of serving the Sanskrit literature.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीवेंकटेश्वरोदाहरणम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रथमाविभक्तिः

जयति विनीलनीरधरचारुशरीररुचि, बृंहत्कृपा
श्रयहृदय : प्रपन्नजनरञ्जनमञ्जुलमानस : प्रभु :
स्मयमदूरवृत्ति, रतिशान्तरतो, वरवेंकटाचल
प्रियवसती रमापति रशिष्टहरो जगदीश्वर स्सदा

कलिका

अपिच मङ्गलदेवताहृदयाब्जमधुमाद्यन्मिलिन्द :
तपनकोटिद्युतिनिषेवितधाममयवदनारविन्द :
वेंकटाचलशिखरमन्दिरविहरमाणविलासमूर्ति :
किंकरीकृतपङ्कजासनशंकरादिकदिव्यमूर्ति :
भक्तनेत्रचकोरसंततिपर्वपूर्णशरत्सुधांशु :
भक्तहृदयांभोभवाकरभासनोद्यतलोहितांशु :
मुक्तिमुकनिजपदाश्रितयुक्तमानसराजहंस :
व्यक्ततेजोलवविधूतनिवातकवचविरोधिकंस :

उत्कलिका

कलियुगार्तोद्धरणदीक्षित
कलिमदापहनिशितवीक्षित
नतजनावनललितवीक्षित
यतिपतिप्रतिभासमीक्षित
दररथाङ्गगदासिभासुर
करसरोरुहसंहृतासुर
भुवनरक्षाव्रतधुरीण :
भुवनमायाबन्धरीण :

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्वितीया विभक्तिः

भक्ताभीप्सितपूरणैकनिरतं भक्तोपदाग्राहिणं
भक्तार्तोद्धरणाय वेंकटगिरिं प्राप्तं मुमुक्षुप्रियम्
व्यक्ताव्यक्तपरापरार्थघटनाव्यासञ्जितञ्च स्वयं
व्यक्तं मञ्जुलमङ्गलाकृति महं पद्मापतिं भावये

कलिका

अपिच परमतपोबलज्ञानामलानन्दादिपूर्णं
कृपणजनतावनपरायणनिपुणताघमतावकीर्ण
अलितमालेन्दीवरातसिजलदजित्वरचारुसुषमं
विलयकालचराचरात्मकविश्वसंहरणैकविषमं
गिरिशवत्सविरिञ्चिधेनुक्षीरधारापुष्टमूर्तिं
हरगिरीशामरञ्जरीसुरकरटिहिमरुचिजेतृकीर्तिं
रासकेलीनिरतवल्लवरमणिनिकरोद्भासमानं
व्यासनारदभृगुपराशरवामदेवोपास्यमानं

उत्कलिका

अभयमुद्रास्वस्तिकाञ्चित
सभयसंश्रितपालनाञ्चित
खिन्नजनतावनपरायण
सन्नतावनकृतितुरायण
नवनवोन्मेषत्विडञ्चित
रविसुतारसरागराञ्जित
नित्यनूतनचारुसुषमं
सत्यशीलसौन्दर्यसुषमम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तृतीया विभक्तिः

सत्यं यस्य विराजते मह इदं संसारमूलं यतो
नित्यं व्यक्त मसच्चिदप्यहरहो नेतुः परिद्योतते
दैत्यध्वंसि च यच्चरित्रमसकृत् ते स्तूयते दैवतै
स्सत्याख्येन च वेंकटाद्रिपतिना संगच्छतां चित्सती

कलिका

अपिच वकुलमालिकाह्वयादयानिभालितेन
निपुणयतिपतिप्रतीतनिचितभोगलालितेन
निगमचोरहननधातृनिगमदाननत्परेण
अगमकृतपयोधिमथनहवनकृतिधुरंधरेण
बलकटीकृताचलोरुभर्मनयनमारणेन
कलुषमदविरोधकुटिलकनककशिपुदारणेन
सकलसुरविरोधिबलिरसातलप्रयापकेन
सकलविकलकुपितकुपतिसन्ततिप्रमापकेन

उत्कलिका

क्रूरदशमुखादिहनन
घोरचेदिपादिखनन
दुष्टमतिविमोहदान
रुष्टयवनजनविशसन
कर्मसुव्रतैकतान
धर्मपालनैकतान
वेंकटाचलाधिपेन
पंकजासनाधिपेन

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चतुर्थी विभक्तिः

श्रीकल्याणगुणाकराय, भुवनक्षेमंकरप्रक्रिया-
व्याकोचत्करुणारसार्द्रहृदयव्यायोगपूर्णात्मने
पाकारिप्रमुखामरालिनिलयप्राज्यस्वराट्टालक-
प्राकारायितविक्रमाय निखिलब्रह्माण्डनेत्रे नमः

कलिका

अपिच चन्द्रिकातपावहानुरूपलोचनाय
त्रपितहृदयनिचयकृतसुधारसाभिषेचनाय
स्वातिदूषिदोषिबाणबाहुनिवहभञ्जनाय
स्वातिभक्तिमुक्तिनिरतसदयहृदयरञ्जनाय
सकलनिगमसारभूतसत्यतत्वबोधकाय
सकलसुकलसूरिकुशलसरलसौख्यसाधकाय
भक्तवत्सलप्रपन्नपरमभोग्यविश्रुताय
शक्तियुक्तिभुक्तिमुक्तिसक्तभक्तसंस्मृताय

उत्कलिका

परमयोगजगदुपाय
परिहृतार्तजगदपाय
विततभुवनभरितमाय
सततसर्वधानपाय
सुखितसकलमुनिनिकाय
नखविदीर्णदनुजकाय
मत्तदितिजभेदनाय
सत्तमानसोदनाय

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पञ्चमी विभक्तिः

श्रीमद्वेंकटनायकात् श्रुतिनुतश्रीकात् जगत्संभव
स्थेमोज्जासनकारणात्, सुमनसां श्रेयःपदप्रापकात्
सीमातीतमहोयशोवलतपश्श्रेयोदयायोदयात्
श्रीमान्यात् परमप्रपन्नरसिकात्, सेव्यः परो नास्ति मे

कलिका

अपिचोज्ज्वलमणिहारमनोज्ञात्
अपराजितविनुतामलसंज्ञात्
परमज्ञानैश्वर्यानन्दात्
परमकृपावितपण्डितवृन्दात्
परमव्योमविभासुररूपात्
परममुनीशप्रणिहितरूपात्
आमोदादिविहारविलोलात्
सामादिश्रुतिसंनुतशीलात्

उत्कलिका

नतहितकामित
ततिपूरणरत
वरवरमुनिनुत
सुरपरिवृढनत
लीलामानुप
हेलापूरुष
जगतीपालात्
जगतीमूलात्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

षष्ठी विभक्तिः

माया यं नहि वेत्ति वेत्ति सुतरां मायास्वरूप च यो
माया यं महि सौति सौति किल यो मायां जगन्मोहिनीं
मायावादवदावदोऽपि नहि यन्माया मतिक्रामते
ध्येयस्यात्मनि वेंकटाचलपते दिव्यांघ्रियुग्मं स्तुवे

कलिका

अपिच मूलदासहृदयहर्म्यनिरतविभ्रमस्य
कुपितकुमतिदितिजहरदकुण्ठितोग्रविक्रमस्य
विमलकमलदलविलोलवित्तत्तद्ग्रमारतस्य
समणिहारमकुटवलयचारुभाविभासितस्य
वनचरावगम्यरम्यमनुजवेषभूषितस्य
कनदुदारचारुहारिकम्रकम्रभाषितस्य
अखिलवङ्मयप्रतिष्ठितात्मतत्वभासनस्य
निखिलपुरुषचित्तवृत्तिनिर्णिरोधशासनस्य

उत्कलिका

विदितनिगमसद्रहस्य
सदयमोदकृद्यशस्य
निजविभावकृतवयस्य
विजय, निखिलमुनिनमस्य
मान, सवनसंप्रशस्य
मान, भक्तभावसस्य
जलदसमनिरीक्षणस्य
जलजविपुलवीक्षणस्य

Funding by MoE-IKS

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सप्तमी विभक्तिः

परमे यस्य विशालकुक्षिकुहरे ब्रह्माण्डभाण्डावली
सुरमार्गे जलदावली, जलनिधौ शुद्धोर्मिमालेव च
परिधिं यान्ति पुरस्तिरोभवमयं ब्रह्मादिमूले परे
वरदे वेंकटवल्लभे मम परा भक्ति स्सदा द्योतताम्

कलिका

अपिच विनतजनानुपालनविविधवेषविलासललिते
निपुणजडधनिनिस्वसमनिर्णिद्रनिजवात्सल्यकलिते
प्रकृतिसुन्दरमधुरवृन्दावनविनोदविमोदरसिके
विकृतिरहितासेचनकनववेषमोहितभवविरसिके
मुरलिमधुरारावविवशितमुदितवल्लवरमणिहृदये
हरपितामहनिगममकुटाविदितविशदोदारहृदये
अरिचिरण्टीचिकुरतिमिरमदापहोज्ज्वलितप्रतापे
निरतिशयनिरपायनिरवधिनिरुपमानपमस्वरूपे

उत्कलिका

सुरवरालयमनिशाचर
वरुणवायुकुबेरपुरहर
हिमकरार्यमधातृमुखसुर
समयताराबिन्धनाब्धर
धरणितेजोगगनशंबर
हरिदचिच्चिन्मयचराचर
पूर्णरूपकलांशशालिनि
पूर्णरूपानन्दशालिनि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संबोधनप्रथमा विभक्तिः

नालं व्यालपति र्दलानि हरितोऽनन्ताधरः कर्णिका
नीलाभ्रं भ्रमरोऽध यस्य सरितो निर्यन्मरन्दोद्गमाः
नीलानाथ! समुद्धरन् कुवलयं नीराकराद् दंष्ट्रया
लीलाकोल! वृषाचलेश रमसे लीलाविभूत्या सदा

कलिका

अपिच वाराशिजाहारिरूपोल्लास
विपुलतेजोयशोवीर्यसारोल्लास
पद्मावतीहृदयपद्मवनकलहंस
पद्मनाभाच्युत स्वप्रभाजितहंस
शुद्धसात्विकरूप सिद्धादिदुरवाप
वद्धकृतस्कन्ताप विद्धतामसभूप
रासकेलीलोल दासपालनशील
व्यासनुतगुणजाल भासितामलहेल

उत्कलिका

राधाहृदरविन्द
बाधाहरमिलिन्द
रदनापजितकुन्द
मदनतातमुकुन्द
भक्तजनमन्दार
मुक्तिमुखसिन्दूर
वेंकटाद्रिविहार
पंचेषुसमविहार

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सार्वविभक्तिकम्

विश्वं यो विदधाति पाति तुदत्ते वेदा य मीशं जगुर्
विश्वं येन सुधार्यतेऽभिदधते विश्वेऽपि यस्मै नमः
शश्वद् यान्ति यत स्सुखं सुमनस स्स्वस्वं जगद् यस्य वा
विश्वं यत्र विभाति स त्व मव मां विष्णो वृषाद्रीश्वर

वेंकटनायकगुणमणि
खचितं सुवर्ण मिद मनिशं जयतात्
विजयसारथिविरचितं
पण्डितहृदयाभरण मुदाहरणम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीरामोदाहरणम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रथमा विभक्तिः

जयता चारुशिरीषपेशलवपु स्संसारवाराशिनौ
स्स्वयमाविष्कृततत्तदाकृतिमहस्सन्धानमर्मंकवित्
दयमानानुपमानमानहृदयो धर्मप्रियो मैथिली
प्रिय ईशानपितामहादिविनुत श्श्रीरामचन्द्रप्रभुः

कलिका

अपिच सकलजगज्जनावननिपुणमायामनुजरूपः
अपरिमितबलसाहसोत्साहादिसंपूर्णस्वरूपः
कुशिकसुतकृतसवननाशनकुटिलपलभुङ्निवहहन्ता
वशिशिखामणिदारशापनिवारणाद्भुतशक्तिरन्ता
सकलनृपचयभयदशांभवचापखण्डनलब्धकीर्तिः
विकलजनकमनोनुरञ्जनविविधगुणमणिपूर्णमूर्तिः
जनकजाललनामनोहरचारुलावण्याभिरामः
अनुपहतनिजबलपराजितघनरुषागतपरशुरामः

उत्कलिका

परमहितगुहृदयरञ्जन
परमहर्षिमनोनिगुञ्जन
मुनिमनोहररूपसुन्दर
दनुजजलनिधिमथनमन्दर
विनतलक्ष्मणपर्युपासित
मुनिवरोचितवेषभासित
महितगौतमविनुतचरितः
सहजसौजन्यादिभूषितः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्वितीया विभक्तिः

सुमनश्चातकमोददं जनकजासौदामनीमानितं
सुमनःकेकिविलासदं परकृपाशुद्धामृतस्यन्दिनम्
समदारुन्तुदगर्जितं शुभकरं शार्ङ्गेन्द्रचापोज्ज्वलं
कमनीयं रघुरामवारिद मिलाक्षामापहं भावये

कलिका

अपिच खरदूषणाद्यरिनिकरमारणं
सपदितापसलोकसंतापवारणं
कनकमृगरूपधरकर्बुरभयंकरं
हनुमदर्कतनूजहरिहृदभयंकरं
अभियातिनेमबलहरवालिबर्हणं
अभयदानप्रीतहरिकृताभ्यर्हणं
हनुमदानीतभार्यावृत्ततोषितं
विनतसागरराजविनुतिमिणभूषितम्

उत्कलिका

कृतजलधिसेतुपद
नतविभीषणवरद,
विधुतकपिबलघोष
बधिरीकृताशेष
ककुबन्तराल, लय
विकटरुद्रातिभय
करवीर्यराजितं
सुरराजिपूजितम्

Digitized by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तृतीया विभक्तिः

ललिते यस्य विशालकुक्षिकुहरे ब्रह्माण्डजालं क्वचि
ज्जलविस्फोटसमं विभाति गिरिभिच्छर्वाजमुख्या स्सुराः
जललेशा इव सन्ति राजतितरां संसारमाया क्वचित्
जलधारेव च तेन रामविभुना संस्पर्धते कोऽमुना

कलिका

अपिच सबलकुंभकर्णकादिदानवार्दनेन
कुपितकुटिलरावणादिघोरदनुजमर्दनेन
विनतमौनिसुरनरादिविविधसुजनसंस्तुतेन
अनलशुद्धजनकजामहासतीसमञ्चितेन
स्वकवियोगखेदभरितभरततापभञ्जनेन
विकचनयनविकचहृदयविविधमनुजरञ्जनेन
जलधिवलयवलितसकलधरणिराज्यशासनेन
ललितरीतिनिगमनीतिलालनैकभासनेन

उत्कलिका

मदनमदनमुग्धरूप
विदुरविदितसुस्वरूप
दलितदिविजविविधताप
मलिनचरितविहितकोप
धृतजगद्धिरोधिरोप
हृतदरिद्रतादिलोप
विकटविमतखण्डनेन
सकलमुनिमण्डनेन

Funding by MoE-IKS

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चतुर्थी विभक्तिः

रामायामलमौनिचिन्मयपिकारामाय वर्षाबुद
श्यामाया प्रमितप्रमाय सुमनश्श्यामालिकामाय ते
सोमास्याय सदाविताश्रितनतस्तोमाय संपद्गुण
ग्रामाय प्रतिपन्थिभीतिकरसंग्रामाय नित्यं नमः

कलिका

अपिच वीरारिनिवहाभीलजन्याय
रिपुजनक्षमणातिरिक्तसौजन्याय
अकलंकचरितनृपनिकरसंमान्याय
विकटसंगरवीरविसराभिमान्याय
सकलमानवलोकसमयैकधन्याय
विकचप्रभावहृतविविधनैर्धन्याय
अतिलोकगंभीरतातिनैपुण्याय
सततसंसारपरिचर्यैकपुण्याय

उत्कलिका

अतिमोहनच्छाय
कृतजगत्प्रच्छाय
बुधरताभिप्राय
विधुतदुरभिप्राय
प्रदितजगदन्याय
विदितनिगमन्याय
घनताभिरामाय
जनकजामाय

Digitized by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पञ्चमी विभक्तिः

पुरुहूतानलदण्डपाणिनिकषासूनुप्रचेतोमरु-
न्नरवाहप्रमथाधिपांबुभवभूनानासुरोपासितात्
स्मरताता न्निखिलाण्डगोलभरणस्फायद्विशालोदरा
न्नरसिंहात् जगदीश्वराद् रघुवरान् नान्यत् परं दैवतम्

कलिका

अपिचावनिजाह्लादधुरीणात्
विपुलगुणोज्ज्वलविभवारीणात्
रविकुलजलनिधिराकाचन्द्रात्
अवितपितामहहरविबुधेन्द्रात्
अतिकोदण्डकिणांकितबाहात्
विततपरार्चाविभवव्यूहात्
परमदयारसभरितदृगन्तात्
स्मरशतमोहनमङ्घ्रिमकान्तात्

उत्कलिका

हनुमत्सेवित
मुनिसंभावित
गिरिजोपासित
हरचिद्भासित
भवभयवारण
भवसुखपूरण
जलदश्यामात्
कलुषविनाशनात्

Funding by MoE-IKS

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

षष्ठी विभक्तिः

विश्वं यन्महसा विभाति विविधं विभ्राजते य स्सदा
विश्वस्मिन् जगति प्रधानपुरुषं वेदा स्तुवान्तिस्म यम्
शश्वत् त्सम्मद मभ्युपैति सुमनोजाति र्यत श्श्रीमतो
विश्वामित्रहितस्य रामनृपतें र्वेवेत्ति कोवा गुणान्

कलिका

अपिच वेदबाह्यदुर्णयाधिकारशोषणस्य
स्वपरभेदविरहसकलजन्तुकोटिपोषणस्य
सततसुजनतानपेतसकलसाधुसेवितस्य
विततनिगमनिगममौलिविविधसूक्तिभावितस्य
कठिनहृदयदितिजनिचयगहनवनदवानलस्य
शठनृपालतूलजालचरमदारुणानिलस्य
स्थिरतटिल्लतायुतातिदीप्रशितिवपुःप्रभस्य
तरुणकिरणदुर्निरीक्षतरणिकोटिसन्निभस्य

उत्कलिका

स्तवसमर्हसुगुणनिचित
कविविरिञ्चनाभिरचित
पविधरामराभिगीत
लवकुशानवरतगीत
नवनवानुभावभरित
भुवनमङ्गलैकचरित
रविकुलाब्धिचन्द्रिरस्य
शिवहृदेवामन्दिरस्य

Digitized by eGangotri CC-0. In Public Domain. Panini Kanya Maha Vidyalaya Collection. MoS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सप्तमी विभक्तिः

परमुप्ता सुगुणैः सुमेरुकुधरं प्राप्ता जगन्मण्डपे
हरिदन्तर्धिता यशोमयलता यस्यान्तरिक्षं गता
परितःकोरकितोडुभिःकुसुमिता भातीन्दुना सर्वदा
वरदे रामपरात्परे स्थिरतरा भक्तिर्मम द्योतताम्

कलिका

अपिच चारुतरवारिदद्युतिश्लपनधीरमुनिमोहमाकृतौ
जपतपोधृतिसमाधिवैभवप्रथितशक्तिपरमर्षिसत्कृतौ
त्रिविधचेतनपरिग्रहाग्रहद्विविधभावकलनैकतत्परे
विविधमङ्गलगुणक्रियादियुग्विविधभूमविलसत्परात्परे
निगममौलिकुलनिश्चितामितप्रगतितत्त्वसुषमैकभूषणे
निगमदूरमतिदुर्विधोद्यमान्वितमनस्कधिषणाभिदूषणे
ललितवीक्षितकृपासुधारसोल्लुलितचित्तनतभक्तहृद्यते
कलुषवृत्तमदखण्डनस्फुरत्कठिनशासननिभालनोद्यते

उत्कलिका

निशितधारकरवालकृत्तदुः
पिशितघस्मरसुराभियातिदुः
प्रसृतशोणितनिधौतधारणी
कुसृतिरूपककलङ्क, पारणी
कृतनृपालकयशश्चरित्रक
प्रतृतकल्मषलतालवित्रक
द्युतिशतावृतनिटालभासुरे
सततरञ्जितविशिष्टभासुरे

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संबोधनप्रथमा विभक्तिः

श्रीमन् राघव कूर्मपादनियत ३शेषावलंबोद्यतः
भूमीपात्रयुतोऽब्धितैलभरितो भूध्रेन्द्रवर्त्मुज्ज्वलः
व्योमैकाञ्जनसंयुतो दिनमणिज्योति स्समुद्योतते
ते मायावितमोनिरासनपर स्तेजःप्रदीप स्सदा

कलिका

अपिच चूडालंकृतामूल्यकोटीर
स्रपदिमोदिततुराषाडजजटाटीर
सत्यसुन्दरशिवस्फाररूपोदार
यत्यमलभावनानृत्यत्कलोदार
नतदयामृतपूर रतद्दशाकर्पूर
कृतिमानसविहार हिततापपरिहार
भृतविनतबृन्दार नतलोकमन्दार
कृतिसस्यकेदार कृतकसवभूदार

उत्कलिका

श्रुतिमौलिनुतशील
हृतदेवरिपुजाल
विततविष्टपमूल
धृतहेममयचेल
सीतासतीलोल
शीतांशुसमभाल
धामद्रुमावाल
रामावनीपाल

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सार्वविभक्तिकम्

श्रीरामो दयतां पुराणपुरुषं श्रीरामचन्द्रं भजे
श्रीरामेण कृतं जगन्नमम नम श्रीरामचन्द्राय ते
श्रीरामान्मुद मेमि सन्तत महं श्रीराम! दासोऽस्मि ते
श्रीरामे हृदयं विभात्वविकलं श्रीरामचन्द्राव मां

श्रीरामचन्द्रगुणमणि
निचितं सुवर्ण मिद मनिशं जयतात्
विजयसारथिविरचितं
पण्डितहृदयाभरण मुदाहरणम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीरामानुजोदाहरणम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रथमा विभक्तिः

जयति भुवनदीप स्संहृतार्तानुतापः
नियमधुतविकारो निश्चितान्नायसारः
प्रियवचनवितानः प्रीतसूरिप्रतानः
स्मयहरयतिवर्यः स्वामिरामानुजार्यः

कलिका

अपिच वौदकविपणिहीरः
नृपशुसंस्करणैकधीरः
परमसात्त्विकपथविहारः
चरमपदरतसाधुहारः
भवविकारविभावदूरः
त्रिविधसंज्वरतिमिरसूरः
श्रुतिमनोहरततविचारः
श्रुतिशिरोमतकृतविचारः

उत्कलिका

चेतनोद्धर
णातिमतिधर
शमदमाकर
समशिवंकर
यमिमनोहर
सुमतिभयहर
सुगतिसारः
प्रगतिकारः

Digitized by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्वितीया विभक्तिः

श्रीरामप्रियसेवनैकहृदयं श्रीकेशवार्यात्मजम्
श्रीराजीवदलयताक्ष मनघं श्रीरंगराजप्रियम्
श्रीरम्याकृति मुज्ज्वलात्मचरितम् श्रीभाष्यकारं गुरुं
श्रीरामानुजयोगिपुङ्गव महम् श्रीदेशिकेन्द्रं भजे

कलिका

अपिच श्रुतिललनार्तिविदूरं
श्वपचमहीसुरसममतिसारं
काषायांवरवेषमनोज्ञं
दूषितनिगमविदूषिप्रज्ञं
तत्त्वमसिश्रुतितत्त्वाभिज्ञं
तत्त्वपरत्वध्यानोपज्ञं
श्रुतिहितसूक्तिव्रततिविकासं
कृतदुष्पथरतमतपरिहासं

उत्कलिका

तत्त्वत्रयगुण
तत्त्वनिरूपण
तत्त्वविवेचन
तत्त्वनिबोधन
निपुणमहामति
विपुलमहस्तति
भासितमूर्तिम्
भासुरकीर्तिम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तृतीया विभक्तिः

येनाकारि जग द्विकासकलितं येनैव पूतं जगद्
येनाम्नायगिरस्समन्वययुता येनोद्धृताः पामराः
येनाद्वैतमतं विशेषसहितं येन प्रभुः पालितः
तेन श्रीयतिराजराजमणिना दीनोऽयं मुज्जीव्यते

कलिका

अपिच पूर्वसूरिहृदयहारिभूरिदर्शनेन
विपथरतविरुद्धवादविबुधवदनकर्शनेन
विषमजिनमतप्रवादविपिनदारुणानलेन
विषयलोलगुरुमतद्रुविलयभीषणानिलेन
कुपथपाशुपतमतादिकुधरनिकरपविकरेण
चपलशंकरप्रवादचटुतमोदिवाकरेण
दुरितनिरतसुगतविमतदुष्टभुजगगारुडेन
दुरितविरतवरदनिरतधरणिविबुधपरिवृढेन

उत्कलिका

कामरहितकर्मयोग
सीमरहितभक्तियोग
परमदास्यनिरतभोग
चरमपदविशिष्टभोग
परिहर्तृपणार्तरोग
परिहर्तृतार्तिविविधरोग
दुष्टवादिभीकरेण
शिष्टवादिमोहरेण

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चतुर्थी विभक्तिः

चिदचिन्नाथविशिष्टतत्वसुषमाजीवातवे सेतवे
मदमोहोग्रभवार्णवस्य भगवन्मायाजगद्वेदिने
स्वदयोज्जीवितचेतनप्रततये सौहार्दवाराशये
मदमोहभ्रमभञ्जनाय यतिराण्मान्याय भूयो नमः

कलिका

अपिच रङ्गपुरराडभङ्गुरानुपमयोगबलल्लालितात्मने
त्रिपुरधस्मरपरत्वसण्डनत्रिपददर्शननिरूपणात्मने
परमवैष्णवपथप्रदर्शनप्रथितदर्शननिदर्शनाजुषे
वरदराजकरुणासुधारसप्रपुषितोपचितचिन्मयत्विषे
सकलवेदमतसारसंग्रहप्रकटनाद्भुतयशोविहारिणे
विकटवादमदमत्तकोविदभ्रुकुटिमात्रपरिभूतिकारिणे
परमसूरिशठवैरियामुनप्रमुखदिव्यमतरीतिपोषिणे
चरमसूक्तिरतदासवासनापरिधिनिर्दलनधीरभाषिणे

उत्कलिका

चिदचिदीश्वरभिदावबोधन
प्रदितवेदविमतानुरोधन
प्रथितसारतरकीर्तिसुन्दर
व्यथितदुर्विधकुधीपुरन्दर
श्रुतिशिरोभिमतवादकोविद
द्युतिमहोमहितात्मसंविद
प्रकृतिजित्वरगभीरमूर्तये
प्रकृतिसुन्दरमनोज्ञमूर्तये

Digitized by eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पञ्चमी विभक्तिः

कुव्याख्यानशतैरपार्थघटकैः क्षुब्धा त्रयीभारती
दिव्यानन्दमुपागमद् यदुदयाद् देवादिदेवो मुदम्
भव्यं प्राप विषादमीयुरवनौ पाषण्डषण्डाः परं
श्रीव्याख्यातृमणेस्समो यतिपतेस्सेव्योऽस्ति नः को गुरुः

कलिका

अपिच परंधामाश्रयकारात्
तपनीयोज्ज्वलदपघनरुचिरात्
यादवमिश्रकुमायादलनात्
यादवराजदयावहकलनात्
यवनतनूजाह्लादनलोलात्
अवनिजनोद्धरणाङ्कितशीलात्
स्वानुग्रहहृतसंसृतिबन्धात्
स्वानुग्रहकृतसंस्कृतिबन्धात्

उत्कलिका

जगदुज्जीवक
नगधरसेवक
नतजनतारक
दुरितनिवारक
श्रुतिमतभूषण
मितहितभाषण
जगदाभरणात्
अगतिकशरणात्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

षष्ठी विभक्तिः

चण्डालादिधरासुरान्त मखिलं संस्कारतोऽपीपवन्
मुण्डिक्षुद्रगुरुप्रभाव महरन् निर्मूल मुद्भूय यः
चण्डांशूद्भटतेजसऽऽन्धभरितं संसार मादीदपत्
पाण्डित्यप्रतिभानिधे र्यतिपतेः पादैकदासोऽस्म्यहम्

कलिका

अपिच विषमविषयवादयन्तृतानिरोधकस्य
जपतपस्समाधियोगचरमलक्ष्यबोधकस्य
शारदाप्रदत्तभाष्यकारबिरुदराजितस्य
वारिजोदरैकदास्यभरितचित्तसभाजितस्य
व्यासगुरुपराशरादिवचनचणविचक्षणस्य
वासुदेवपरपदार्थिदासहृदयरक्षणस्य
परमभक्तिपरमयोगपरमभोगभूषितस्य
परमशान्तिपरमदान्तिपरमकान्तितोषितस्य

उत्कलिका

ब्रह्मराक्षसप्रहरण
जिह्मगुरुमदापहरण
सुप्रसन्नसूरिशरण
सुप्रसन्नहृद्विहरण
करसमुज्ज्वलत्त्रिदण्ड
परमदेशिकप्रकाण्ड
त्रिभुवनैकतात्त्विकस्य
त्रिभुवनैकतात्त्विकस्य

Funding by MKS, MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सप्तमी विभक्तिः

सदसद्वादविवादमोदमदिरास्वादावलिप्तात्मदु-
र्मददुर्मोहकुदृक्कुवादजडिमभ्रान्त्यादिनिर्मूलके
चिदचिन्नाथनिरूपणव्रतरते श्रीनाथमोदावहे
मदनातङ्करे गुरौ यतिपतौ मद्भक्ति रस्त्वक्षता

कलिका

अपिच परानन्दाञ्चितचेतसि
कपटात्मकवनकाञ्चनरेतसि
शठरिपुभाषितसारज्ञातरि
शठहठवादविशारदजेतरि
हरपरपामरपरिसंस्कर्तरि
हरिपरतापुनराविष्कर्तरि
अखिलाम्नायसमन्वयकर्तरि
निखिलागममतनिर्णयकर्तरि

उत्कलिका

घोराशाजल
मारोर्मीकुल
दारावर्तकु
मारग्राहकु
मलजंझाजव
विलयींकृतभव
जलधिवहित्रे
कलुपलवित्रे

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संबोधनप्रथमा विभक्तिः

जय रामानुज देशिकेन्द्र सदयस्वान्त स्थितप्रज्ञ हे
जय काषायशिखोपवीतसुषमासारप्रसन्नाकृते
जय वेदान्तविवादनिर्णयपटो षड्दर्शनीतत्त्वविज्
जय संसारमरुस्थलामृतनिधे स्वामिन् त्रिलोकीगुरो

कलिका

अपिचार्तजनाह्लादविधायक
चपलपुरञ्जनसद्गतिदायक
संस्कारावलिसंस्कृतपामर
संस्कारोज्झितसौगतडामर
मायावादोन्मादनिरासक
श्रेयोवादविशेषविकासक
परमविशिष्टाद्वैतस्थापक
नरसंसृतिदुर्णयनिर्वापक

उत्कलिका

भारतभूषण
भारतपोषण
परमतखण्डन
हरिमतमण्डन
निगमशिरोनुत
सुगममतोद्यत
नतसुरभूमिज
यतिरामानुज

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सार्वविभक्तिकम्

यतिराजो जगतीं पुनाति, सुमनोहारं यतीन्द्रं भजे,
यतिराजा श्रुति रुद्धृता, मम नमो यन्त्रे यतीन्द्राय ते,
यतिराज श्श्रुतिसम्मतं मत मभू, दानन्द मेति प्रजा
यतिराजो, यतिराजि भान्ति सुगुणा अद्धा, यतीन्द्राव माम्

श्रीरामानुजगुणमणि
निचितं सुवर्ण मेत दनिशं जयतात्
विजयसारथिविरचितम्
पण्डितहृदयाभरण मुदाहरणम्

❀ यदिनाम सीसपद्य मुदाहरणप्रक्रियाया मर्हति प्रयोक्तव्यतां तदेद मस्मि-
न्नुदाहरणे द्वितीयाविभक्तिस्थाने पाठकै स्समुपग्राह्यम्।

❀ हरिनियोगा ज्जनोद्धरणाय रामानु
जार्यरूपेण यस्त्ववततार
विपरीतमतजात मपमार्गगतवाद
निवहञ्च सपदि यो नीरुरोध
आम्नायपाथोधि मवलोड्य सद्भाष्य
ममृतसारं हारि य श्चकार
मतजातिकुलभेद मतिगम्य मनुराज
मावालगोपाल मादिदेश
जगति मायाप्रवाद मुत्सार्य निगम
निगदितं [illegible]
[illegible]
[illegible]दिशेषांशसम्भूत मानतोस्मि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



शोधनपत्रम्

पृष्टे	पंक्तौ	शोधितम्
2	13	मुक्तिकामुक
3	1	द्वितीया
3	2	भक्ताभीप्सित
3	21	रञ्जन
7	13	वाङ्मय
8	7	हाववेष
8	12	मकुटाव्यक्त
9	5	वृषाचलेश
10	4	यस्य वा
10	5	विष्णो
16	2	निकषापुत्र
17	3	वेदा स्तुवन्ति
22	7	वैदिक
25	8	त्रिपुरघस्मरपरत्वखण्डन
27	4	तेजसाऽऽन्ध्य
28	20	झंझा



Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीविजयसारथिकृतयः

मुद्रिताः

आन्ध्रलिपौ

प्रबोधगेयानि
शबरीविलापः
विषादलहरी
अश्रुतर्पणम्
गीतमाला
मल्लिकार्जुनसुप्रभातम्
प्रसादलहरी
श्रीव्रतम् (तिरुप्पावै)
भारतजननीसुप्रभातम्
वेणुगोपालसुप्रभातम्
ज्येष्ठास्तवः

संस्कृतलिपौ

आत्मदानम् (गीतकाव्यम्)
गीताञ्जलिः (स्वतन्त्रः)

अमुद्रिताः

मनोरमा, सुशीला } उपन्यासः
दंभयुगम् (प्रहसनम्)
रवीन्द्रगीताञ्जलिः
आप्तलेखः
मित्रलेखः
ज्योत्स्नालहरी
डमरुकम्
शंखारावः
अमरसन्देशः
भारतविभूतिस्तुतिः
गद्यप्रवाहः
वेमुलवाड राजेश्वरसुप्रभातम्
श्रीरामप्रपत्तिः
अन्याश्च

Funding by IKS-MoE